वेदान्त संस्कृत: संपूर्ण

क्र.नं. १३८

# मुक्तिमतानि

६४१ पे. १२०

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(1)

# मुक्तिः

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

# ॥ अथ मुक्तिः ॥

॥ हरिः ॐ तत्सत्। ब्रह्मणे नमः॥ एवं तावद् वेदस्य कर्मकाण्डादि प्रपंचितमिदानीं ज्ञानकाण्डमारभ्यते। नहि ज्ञानेन सदृशं पवित्रमिह विद्यते। ज्ञानादेव तु कैवल्यम्। ज्ञानं ज्ञानवतामहम्। इत्यादि भगवद्वाक्यैर्ज्ञानमेव परम्। तज्ज्ञानं तु वेदाधीनम्। चिद्ज्ञाने अर्थाद्वेदो ज्ञानमय इति सिद्धम्॥

ननु कथमेतद्विपरीतमुक्तम्। सम्पूर्णो वेदः कर्मपरः उक्तं च भगवता जैमिनिना " आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तद्भूतानां क्रियार्थेन समन्वय इति पूर्वमीमांसायां प्रथमाध्याये द्वितीयपादे अर्थवादाधिकरणे पूर्वपक्षे सूत्रं तद्यथा॥ आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते॥१॥ अस्यार्थः। वेदानां क्रियाप्रयोजनत्वं तस्माद्येषां क्रियाप्रयोजनत्वं नास्ति तेषां निष्प्रयोजनत्वम्। वेदप्रवृत्तेः किं बीजं, यज्ञादिक्रियाद्योतनान्नान्यत्। अतो यदा क्रिया न द्योत्यते तदा वेदैः किंचित् कारणं नास्तीति चेन्न। वेदे ष्वत्र ज्ञानं नास्तीति वक्तुं न शक्यते। कुतः। अध्यात्मप्रतिपादका मंत्रा बहवो वेदेष्ववर्तन्ते। उपनिषदामप्यादिबीजं वेद एव। ज्ञानप्रतिपादका वेदमंत्रास्ते यथा॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते॥ तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥ ऋ॰ अ॰ २ सू॰ १६४ म॰ २०। ऋचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुः॥ यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते॥ ऋ॰ अ॰ २ म॰ ३९॥ इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्॥ एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥४६॥ ऋ॰ सू॰ १६४॥ नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्॥ किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्॥१॥ न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः॥ को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः॥ अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव॥ सहस्तोमाः सहछन्दस आवृतः सहप्रमा ऋषयः सप्त दैव्याः॥ पूर्वेषां पंथामनुदृश्य धीरा अन्वालेभिरे रथ्यो न रश्मीन्॥ ऋ॰ अ॰ १०॰ ८॥ अत्र भगवान् यास्कमुनिरात्मपरं प्रतिपादयति तद्यथा नासदासीन्नो सदासीत्तदानीमितीदं सेषात्मजिज्ञासा सैषा सर्वभूतजिज्ञासा ब्रह्मणः सार्ष्टितां सरूपतां सलोकतां गमयति य एवं

(3)



वेदं नमो ब्रह्मणे महते भूताय नमः पारस्कराय नमो यास्काय ब्रह्म शुक्र
मसीय ब्रह्म शुक्रमसीय ॥३७॥ निरुक्त उ·ष·अ·८ (१४) ॥

यजुर्वेदे वाजसनेय संहितायामेकत्रिंशत्तमे ध्याये ऽध्यात्मप
रा मंत्रा वर्तन्ते ते यथा ॥

अद्भ्यः संभृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे ॥
तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥१७॥

तेन पुरुषेणात्मना पृथिव्यै पृथिव्युत्पत्त्यर्थमद्भ्यो रसः संभृ
तः संगृह्य तेन पृथिवी रचिता। एवमग्नि रसेनाग्नेः सकाशादाप उत्पा
दिताः। अग्निश्च वायोः सकाशाद्वायुराकाशादुत्पादितः। आकाशः
प्रकृतेः प्रकृतिः स्वसामर्थ्याच्च विश्वं सर्वं कर्म क्रियमाणमस्य स विश्व
कर्मा परमात्मा तस्य परमात्मनः सामर्थ्य मध्ये कारणाख्ये ऽग्रे सृ
ष्टेः प्रागृ जगत् समवर्तत वर्तमानमासीत्तदानीं सर्वमिदं जगत्कारण
भूतमेव नेदृशमिति। तस्येश्वरस्य सामर्थ्यस्यांशान् गृहीत्वा त्वष्टा
त्वक्षू-तृन् विश्वकर्मा इदं सकलं जगद्विदधत् अरचयत्। त्वष्टा पूर्ववे
ज्जगद्रचयदित्यत्र श्रुतेः प्रमाणं " ऋतंच सत्यंचाभीद्धात्तपसोऽध्य
अं जायत। ततो रात्र्यजायत ततः समुद्रो अर्णवः॥ समुद्रादर्णवादधि
संवत्सरो अजायत॥ अहोरात्राणि विदधद्विश्वस्य मिषतो वशी।
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत॥ दिवं च पृथिवीं चान्तरि
क्षमथो स्वः॥ इति। पुनश्चेदं विश्वं रूपवत्त्वमेति तदेव मर्त्यस्य
मरणधर्मकस्य विश्वस्य मनुष्यस्यापि च रूपवत्त्वं भवति। आजा
नमग्रे वेदाज्ञापन समये परमात्मा तत्सवान् वेदरूपामाज्ञां दत्तवा
न्। मनुष्याय धर्मयुक्तेनैव कर्मणा कर्मदेवत्वयुक्तं शरीरं धृत्वा इ
ष्टं सुखं भवतु तथा निष्कामेन विज्ञानं परमं मोक्षाख्यंचेति ॥१७॥

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ॥
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥१८॥

किं विदित्वा त्वं ज्ञानी भवसीति पृच्छ्यते तदुत्तरमाह। यतः पूर्वो
क्त लक्षण विशिष्टं सर्वेभ्यो महान्तं वृद्धतम मादित्यवर्णं स्वप्रकाशा
नन्दरूपं तमसोऽज्ञानाऽविद्यान्धकारात् परस्तात्पृथग्वर्तमानं



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

परमेश्वरमहं वेद जानाम्यतोऽहं ज्ञान्यस्मीति निश्चयः। न च तं पुरुषमविदित्वा कोऽपि ज्ञानी भवितुमर्हतीति वाच्यम्। कुतः। तमेवेति मनुष्यस्तमेव पुरुषं परमात्मानं विदित्वाऽतिमृत्युं मृत्युमतिक्रान्तं मृत्योः पृथग्भूतं मोक्षाख्यं परमानन्दमेति प्राप्नोति। न चान्यथेति। एवकारात्तमीश्वरं विहाय नैव कस्यचिदन्यस्य लेशमात्राप्युपासना ब्राह्मणेन कदाचित्कार्येति गम्यते। कथमिदं विज्ञायतेऽन्यस्योपासना नैव कार्येति नान्यः पन्था इति अयनाय व्यावहारिकपारमार्थिकमोक्षसुखायान्यो द्वितीयः पन्था मार्गो न विद्यते। किन्तु तस्यैवोपासनमेव सुखस्य मार्गोऽतो भिन्नस्येश्वरगणनोपासनाभ्यां मनुष्यस्य दुःखमेव भवतीति निश्चयः। अतः कारणादेष एव पुरुषः परमात्मा सर्वैरुपासनीयस्तस्योपासनमेव [blot] जीवन्मुक्तिरिति मन्त्राशय इति दिक्॥ १८॥ २

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते॥
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा॥ १९॥ ३

स एव प्रजापतिः सर्वस्य स्वामी जीवस्यान्यस्य च जडस्य जगतोऽन्तर्गर्भे मध्येऽन्तर्यामिरूपेणाजायमानोऽनुत्पन्नोऽजः सन्निहितं चरति। तत्सामर्थ्यादेवेदं सर्वं जगद्बहुधा बहुप्रकारं विजायते विशिष्टतयोत्पद्यते। त[blot]स्य योनिमिति तस्य परब्रह्मणो योनिं सत्यधर्मानुष्ठानं वेदविज्ञानमेव प्राप्तिकारणं धीरा ध्यानवन्तः परितः सर्वतः प्रेक्षन्ते। यस्मिन् विश्वा विश्वानि सर्वाणि भुवनानि सर्वे लोकास्तस्थुः स्थितवन्तस्तस्मिन्नेव परमात्मनि धीरा ध्यानवन्तो ज्ञानिनः ह इति निश्चयार्थे मोक्षानन्दं प्राप्य तस्थुः स्थिरा भवन्तीत्यर्थः॥ १९॥

यो देवेभ्य आतपति यो देवानां पुरोहितः॥
पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये॥ २०॥ ४

यः पूर्णः पुरुषो देवेभ्यो विद्वद्भ्यः यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणातीति श्रुतेः। वेदज्ञानसंबन्धाद्ब्राह्मणा अपि देवास्तत्प्रकाशार्थमातपति। आ समन्तात् तदन्तःकरणे प्रकाशयति नान्येभ्यश्च। यश्च देवानां विदुषां पुरोहितः पुरो ये सत्कर्मसु धीयते सो। पुर एनं दधातीति वा सुक्तिसुखे विदुषो दधातीति। देवेभ्यो विद्वद्भ्यो यः पूर्वः पूर्वमेव सनातनत्वेन वर्त्तमानः सन् जातः प्रसिद्धोऽस्ति। तस्मै रुचाय रुचिकराय ब्रह्मणे नमोऽस्तु। यश्च देवेभ्यो विद्वद्भ्यो ब्रह्मोपदेशं प्राप्य ब्रह्मरुचिर्ब्राह्मिर्ब्रह्मणोऽपत्यमिव वर्त्तमानोऽस्ति तस्मा अपि ब्राह्मये ब्रह्मसेवकाय नमोऽस्तु॥ २०॥ हरिः ॐ तत्सत्॥ ॥ ५॥



Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(5)



रुचं ब्राह्मं जनयन्तो देवा अग्रे तदब्रुवन्॥
यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवा असन्वशे॥ २१॥

रुचं प्रीतिकरं ब्राह्मं ब्रह्मणोऽपत्यमिव ब्रह्मणः सकाशाज्जातं ज्ञानं जनयंत उत्पादयंतो देवा विद्वांसोऽन्येषामग्रे तज्ज्ञानं तज्ज्ञानसाधनं वाऽब्रुवन् ब्रुवंतूपदिशंतु च। यस्त्वेवममुनाप्रकारेण तद्ब्रह्म ब्राह्मणो विद्यात् तु पश्चात्तस्यैव ब्रह्मविदो ब्राह्मणस्य देवा इंद्रियाणि वशेऽसन् भवंति नान्यस्येत्यर्थः॥ २१॥ हरिः ॐ तत्सत्॥ ब्रह्मणे नमः॥ ७॥

४० चत्वारिंशत्तमोऽध्यायः सर्वोऽप्यध्यात्मपरः। तत्राष्टादश मंत्रा ईशावास्योपनिषत्सु प्रसिद्धाः संति। ते सर्वे मंत्रा भगवत्पादैः श्रीमच्छंकराचार्यैर्व्याख्यातास्तेषामेकोदाहरणार्थं गृह्यते स यथा॥

ईशावास्यमिदँ सर्वं यत्किञ्च जगत्यां जगत्॥
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्॥ १॥

भाष्यम्। ईशावास्यमित्यादयो मंत्राः कर्मस्वविनियुक्तास्तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वात्। याथात्म्यं चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणम्। तच्च कर्मणा विरुध्यत इति युक्त एवैषां कर्मस्वविनियोगः। नचैवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं वा कर्तृभोक्तृ वा येन कर्मशेषता स्यात्। सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात्। गीतानां मोक्षधर्माणां चैवंपरत्वात्। तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि। यो हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काणकुंठत्वाद्यनधिकारधर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति हि अधिकारविदो वदंति। तस्मादेते मंत्रा आत्मनो याथात्म्यप्रकाशनेनात्मविषयं स्वाभाविककर्मविज्ञानं निवर्तयंतः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयंतीति। एवमुक्ताभिधेयसंबंधप्रयोजनान्मंत्रान्संक्षेपतो व्याख्यास्यामः॥ ईशा। ईष्टे इतीट् तेनेशा। ईशिता परमेश्वरः परमात्मा सर्वस्य। स हि सर्वमिष्टे। सर्वजन्तूनामात्मा सन्। तेन स्वेनात्मनेशावास्यमाच्छादनीयं, किम्। इदं सर्वं यत्किंच यत्किंचिज्जगत्यां पृथिव्यां जगत्। सर्वं स्वेनात्मनाऽहमेवेदं सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं परमात्मना। यथा चन्दनागर्वादेरुदकादिसंबंधजक्लेदादिजं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेनाच्छाद्यते स्वेन पारमार्थिकेन गंधेन तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद्द्वैतरूपं पृथिव्यां जगत्यामित्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विका

त्ज्ञातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्। एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसन्न्यास एवाधिकारो न कर्मसु तेन त्यक्तेन त्यागेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रो भृत्यो वा आत्मसंबंधितयाऽभावादात्मानं पालयत्यत स्त्यागेनेत्ययमेवार्थः। भुंजीथाः पालयेथाः। एवं त्यक्तैषणस्त्वं मा गृधः गृधिं माकांक्षां माकार्षीर्धनविषयाम्। कस्यस्वित् कस्यचित् परस्वं धनं स्वस्य वा धनं मा कांक्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा मा गृधः कस्मात्, कस्यस्विद्धनमित्याक्षेपार्थो न कस्यचिद्धनमस्ति यद्गृध्येत। आत्मैव सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो मिथ्याविषयां गृधिं मा कार्षीरित्यर्थः॥१॥

अस्य भाष्यस्य टीका आनंदज्ञानाचार्येण कृता सैव विद्वन्मान्या। तोदर्श्यते॥ येनात्मनापरेणेशाव्याप्तं [illegible] सोहं देहद्वयोः साक्षी वर्जितो देहतद्गुणैः॥ ईशावास्यमित्यादिमंत्रान् व्याचिख्यासुर्भगवान् भाष्यकारस्तेषां कर्मशेषत्वशंकां तावत् व्युदस्यति। तथा हि कर्मजडाः केचनेमन्यंते ईशावास्यमित्याद्यो मंत्राः कर्मशेषा मंत्रत्वाविशेषादिषे त्वादिमंत्रवत्॥ अतः पृथक् प्रयोजनाद्यभावाद्व्याख्येया इति तान् प्रत्याह। ईशावास्यमित्यादय इति। कर्मस्वविनियुक्ता इति। इषे त्वेति। शाखां छिनत्तीत्यादिवत्। विनियोजकप्रमाणादर्शनात् प्रकरणास्नात्वादेरित्यर्थः। श्रौतविनियोगाभावेऽपि बर्हिर्देवसदनं दामीत्यस्य बर्हिर्लवन प्रकाशन सामर्थ्येन [illegible] त् बर्हिर्लवने यथा विनियोगस्तथा कर्मशेषात्मप्रकाशन सामर्थ्येन कर्मस्वेषां विनियोगद्रूत्यपि नाशंकनीयमित्याह। तेषामिति। शुद्धादिविशेषणस्यात्मनः कर्मशेषत्वे प्रमाणाभावात् यथात्म्यं न केवलं कर्मानुपयोगि किंतु कर्मणा विरुध्यत इत्याह। यथात्म्यं चेति। शुद्धोऽहं स्वभावतो नतु केनापि पापना विद्धः सर्वत्रैकोऽशरीर आकाशोपम इति जानन् कटाक्षेणापि कर्म वीक्षते। किंत्वापात प्रतीपांतरेप्येतादृशी निरुणध्येव कर्मप्रवृत्तिमित्यर्थः। किंच यः कर्मशेषः स उत्पाद्यो दृष्टो यथा पुरोडाशादिः। विकार्यः सोमादिः। आप्यो मंत्रादिः। संस्कार्यो व्रीह्यादिस्तेषु उत्पाद्यतादिरूपत्वम् व्यापकं व्यावर्तमानमात्मयाथात्म्यस्य कर्मशेषत्वमपि व्यावर्तयति। तथात्मयाथात्म्यं कर्तृभोक्तृच न भवति। येन ममेदं समीहितसाधनं ततो मया कर्तव्यमित्यहंकारान्वयपुरःसर कर्त्रान्वयः स्यादित्याह। नचैवमिति। ननु उपनिषदि जपोपयोगित्वमुपनिषदां शक्यं वक्तुम्। तथा हि। ईशावास्यमित्युपक्रम्य स पर्यगाच्छुक्रमित्युपसंहारादनेजदेकं तदंतरस्य सर्वस्येत्यभ्यासदर्शनान्नैतद्देवा आप्नुवन्नित्यपूर्वता संकीर्तनात् को मोहः कः शोक एकत्वमनुपश्यत इति फलवत्त्वा संकीर्तनात् कुर्वन्नेवेहेति जिजीविषेदर्थदर्शिनः कर्मकरणानुवादेनासूर्या नामत इति निन्दयैक्यात्म्य दर्शनस्य स्तुतत्वात्तस्मिन्नपो मातरिश्वा दधातीत्य

---

+ लवनं नपुं॰ लू-ल्युट्। छेदने। लूञ् क्र्यादि॰ उ॰ सक॰ सेट् लुनाति लुनीते अलावीत्। शब्द॰ तारा॰॥

(७)



भिधायिन्याश्चास्यास्तावदुपनिषदैकात्म्यतात्पर्यं दृश्यते। एवमन्यासा
मप्युपनिषदामुपक्रमोपसंहारैकरूप्याभ्यासापूर्वताफलवत्त्वार्थवाद
युक्त्युपपादनानि षट् तात्पर्यलिंगानि विकल्पेन समुच्चयेन वास्माभि-
स्तत्त्वालोके दर्शितानीति नेह प्रतन्यन्ते। किंच प्रत्ययसंवादोपि बलवत्
कारणम् प्रसिद्धे विद्यते चोपनिषदर्थे गीतादिसंवादस्तस्मादुपनिषत्पद
समन्वयेनावगम्यमानमैकात्म्यं न प्रमाणांतरानुपलंभविरोधेनोपलं
भनीयम्। यथेंद्रियांतरेणानवगम्यमानमपि रूपं चक्षुषा गम्यमानं नापह्नुव
ते तथैकात्म्यमपि नापह्नवार्हमित्याह। गीतानामिति। समं सर्वेषु भूतेषु
तिष्ठंतं परमेश्वरम्। विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यतीत्यादिगी
ता। एक एव हि भूतात्मा सर्वभूतेष्ववस्थितः। एकधा बहुधा चैव दृश्यते जल
चंद्रवदित्यादि मोक्षशास्त्राणां चैकात्म्यपरत्वादित्यर्थः। तद्येतादृशमा
त्वतत्त्वं तर्हि निरधिकारित्वात्कर्मकांडमुच्छिद्येतेत्यपि नाशंकनीयमि
त्याह। तस्मादिति। औपनिषदात्मयाथात्म्यं च तीव्रक्रोधाक्रांतस्वांतं
प्रत्येव श्येनादिविधिप्रामाण्यम्। तथा मिथ्यादर्शिनं प्रत्येव कर्मविधि
प्रामाण्यमित्यर्थः। अत्र जैमिनिप्रभृतीनां संमतिमाह। सोहीत्यादिना।
अर्थित्वादियुक्तस्य कर्मण्यधिकारः षष्ठे प्रतिष्ठापितः। अर्थित्वादि च मिथ्या
ज्ञाननिदानम्। नहि नभोवन्निर्लिप्तस्य स्वत एव दुःखासंसर्गिणः परमा
नंदस्वभावस्य सुखं मे स्याद्दुःखं मे माभूदित्यर्थित्वम्। शरीरेंद्रियसम
र्थोहमित्यभिमानित्वं मिथ्याज्ञानं विना न संभवतीत्यर्थः। यस्मादात्म
याथात्म्यप्रकाशका मंत्रा न कर्मशेषभूता नच भानान्तरविरुद्धास्त-
स्मात्प्रयोजनादिमत्त्वमपि तेषां सिद्धमित्याह। तस्मादेत इति॥ व्या
ख्येयत्वमुक्त्वा प्रतिपदं व्याचष्टे। ईशेति। ईश ऐश्वर्येऽस्य धातोः क्विपि लु
से कृदन्तरूपमीट् तस्य तृतीयैकवचनमीशेति। ननु कर्तरि क्विब्विधा
नात् परमेश्वरस्याक्रियत्वात्कथं क्विबन्तशब्दवाच्यतेति तत्राह। ईशा
तेति। मायोपाधीशानकर्तृत्वसंभवाच्छब्दवाच्यता। न विरुध्यते निरु
पाधिकस्य च लक्ष्यत्वं भविष्यतीत्यर्थः। ईशित्रीशितव्यभावेन तर्हि भे
दः प्राप्त इत्याशंक्याह। सर्वजन्तूनामिति। यथादर्शादिषु प्रतिबिंबाना
मात्मा बिंबभूतो देवदत्त ईशिता भवति तथा कल्प्यभेदेनेशित्रीशितव्य
भावसंभवान्न वास्तवभेदानुमानं संभवतीत्यर्थः। +वस आच्छादने अ
स्य रूपं वास्यन्त्वत ईश्वरात्मकमेव सर्वं भ्रान्त्या यदनीश्वररूपेण गृ
हीतं तत्सर्वमीश्वर एवात्मैवेति ज्ञानेनाच्छादनीयं सर्वात्मक ईश्वरोऽस्मी
ति ज्ञातव्याशेषतत्त्वोपदेशश्छान्दोग्ये तत्त्वमसीतिवदित्यर्थः। ब्रह्मैवस
र्वमात्मैव मत्प्रकाशाविशेषतः। हेयोपादेयभावोयं न सत् स्वप्नवदी

---

+ वस। आच्छा॰ अदादि॰ आ॰ सक॰ सेट् यजा॰। वस्ते अवात्सीत्।

ष्ये ते। उक्तं च न बंधोस्ति न मोक्षोस्ति न विकल्पोस्ति तत्वतः। नित्य प्रकाश एवास्ति चिद्रवाकारो महेश्वर इति।२। यस्योपदेशिक ज्ञान मात्रेणानृत दृष्टिर्न निरा क्रियते तस्य विचारादि प्रयत्नेन तत्व प्रकाशे सत्यनृत दृष्टिस्तिरस्करिष्यत इत्यभिप्रेत्य दृष्टांतमाह। यथेति। चन्दना गर्वादे रुदकादि संबंधादार्द्रीभावादिना जातं यद्दौर्गन्ध्यमौपाधिकं मिथ्या तद्यथा तत् स्वरूप निघर्षणाभिव्यक्तेन स्वाभाविकेन गंधेनाच्छाद्यते। तद्वद्विचारादेः स्वरूप सद्भाव मिथ्या बुद्धेर्बाधकत्वं संभवतीत्याह। तद्वदेव हीति। स्वभावोऽनादिरविद्या तत्कार्यं स्वाभाविकमित्यादिबाधत्वे योग्यत्व प्रदर्शनार्थं विशेषणम्। एवं विचारादि प्रयत्नवतोऽनृत दृष्टिरित्यसंभावना मुक्त्वा युक्त्यभिज्ञस्य सर्वविद्धंद्वेश्वर एवेति भावनायामधिकृतस्य युक्ति कुशलस्य च विचारे। अधिकृतस्य सर्व कर्म संन्यास एवाधिकार इह मंत्रे विवक्षितस्तेन त्यक्तेनेत्यत्र त्यागपरामर्शनात् त्यजनेन हितज्ञेयं त्यक्तुः प्रत्यक्पदपद मित्यन्यत्राप्युक्तत्वात् पुत्राद्येषणायाश्चित्त विक्षेप हेतुत्वेन प्रसिद्धत्वाच्चेत्यभिप्रेत्याह। एवमीश्वरात्म्येति। चिकीर्षितं सन्न्यासं स्पष्टीकरोति। तेन त्यक्तेनेति। त्यागेनात्मा रक्षितः स्यान्निष्क्रियात्म स्वरूपावस्थानानुकूलत्वात् त्यागस्येत्यर्थः। संन्यासिनः शरीर संधारणोपयुक्त कौपीनाच्छादन भिक्षाशनादिव्यतिरिक्तेपि कथंचिद् द्रव्य परिग्रहे रागश्चेत् प्राप्तस्तन्निरोधे यत्नः कर्तव्यः। तस्य प्रधान विरोधित्वादित्यभिप्रेत्य नियमविधिमाह। एवं त्यक्तैषण इति। स्विदिति निपातस्य सामान्यार्थत्वेपि कस्य स्विद्धीति चिन्तनार्थत्वमन्यत्र प्रसिद्धं तदिह न गृह्यते इत्यनर्थकमित्युक्तम्। व्यवहार दृष्ट्यात्मनैवेदं सर्वं शेष भूतं जडत्वं चिद्रूपरतंत्रत्वादतः प्राप्ते विषये नाकांक्षा कर्तव्येति भाष्य टीका। इतीशावास्य भाष्यस्य टिप्पनं स्वीकृतं मया। तेन बुद्धि प्रकाशोस्तु यथा सूर्योदये तथा॥ १॥

इत्थं वेदेष्वेवात्मज्ञान प्रतिपादका मंत्राः सन्तीति सिद्धम्। अथेदानीमात्मज्ञानं प्रतिपाद्यते। कोयमात्मेत्यत्र ऋग्वेदीयैतरेयोपनिषदि व्याख्यातं तदेवात्र दर्श्यते॥ "आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् स ईक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजताम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आपः स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् तमभ्यतपत्तस्याभितप्तस्य मुखं निरभिद्यत यथाण्डं मुखाद्वाग्वाचोग्निर्नासिके निरभिद्येतां नासिकाभ्यां

Joint project of "The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(9)



प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतां अक्षिभ्यां चक्षुश्चक्षुष आदित्यः
कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ् निरभिद्यत त्वचो लो
मानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनस
श्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः शिश्नं निरभि
द्यत शिश्नाद्रेतो रेतस आपः ॥ इति प्रथमः खंडः ॥१॥

इयमुपनिषदरणसंज्ञात्वेन प्रसिद्धा। ऐतरेयब्राह्मणस्य चरमो भा
ग आत्मतत्वप्रतिपादकस्तस्य षडध्यायाः संति। तत्रायं द्वितीयैतरेयारण्य
के चतुर्थोऽध्यायः। उपनिषत्सु प्रथमोऽध्यायः। इदमारण्यकं सायणाचार्यैः सर्वव्या
ख्यातम्। भगवतः शंकराचार्यस्यापि भाष्यमस्योपरि वर्तते तद्यथा ॥

आत्मेति। आप्नोतेरत्तेरततेर्वा परः सर्वज्ञः सर्वशक्तिरशनायादिस
र्वसंसारधर्मवर्जितः। नित्यशुद्धबुद्धमुक्तस्वभावोऽजोऽजरोऽमरोऽमृतोऽभ
योऽद्वयः। वै इदं यदुक्तं नामरूपकर्मभेदभिन्नं जगदात्मैवैकोऽग्रे जगतः
सृष्टेः प्रागासीत्। किं नेदानीं स एवैको न कथं तदासीदित्युच्यते। यद्यपी
दानीं स एवैकस्तथाप्यस्ति विशेषः। प्रागुत्पत्तेरव्याकृतरूपदमानमात्म
भूतं आत्मैकशब्दप्रत्ययगोचरं जगदिदानीं व्याकृतनामरूपभेदत्वाद
नेकशब्दप्रत्ययगोचरमात्मैकशब्दप्रत्ययगोचरं चेति विशेषः। यथा स
लिलात् पृथक् फेनं नामरूपव्याकरणात्प्राक्सलिलैकशब्दप्रत्ययगोचर
मेव फेनम्। यदा सलिलात् पृथङ्नामरूपभेदेन व्याकृतं भवति तदा सलि
लं फेनं चेत्यनेकशब्दप्रत्ययभाक् सलिलमेवेति चैकशब्दप्रत्ययभा
क् न फेनं भवति तद्वत्। नान्यत् किंचन न किंचिदपि मिषदिति। मिषद्-
व्यापारवदितरद्वा। यथा सांख्यानामात्मपक्षपाति स्वतंत्रं प्रधानम्। यथा
च काणादानामणवो न तद्वदिहान्यदात्मनः किंचिदपि वस्तु विद्यते। किं
तर्ह्यात्मैक एव आसीदित्यभिप्रायः। स सर्वज्ञस्वाभाव्यादात्मा एकः सन्नी
क्षत। ननु प्रागुत्पत्तेरकार्यकारणत्वात्। कथमीक्षितवान्। नायं दोषः सर्व
ज्ञस्वाभाव्यात्। तथा च मंत्रवर्णः। "अपाणिपादो जवनो ग्रहीतेति"। केनाभिप्राये
णेत्याह। लोकानंभःप्रभृतीन् प्राणिकर्मफलोपभोगस्थानभूतान्नु सृजै सृ
जे इति। एवमीक्षित्वाऽऽलोच्य स आत्मा इमाँल्लोकानसृजत सृष्टवान्।१।
यथेह बुद्धिमांस्तक्षादिरेवं प्रकारान् प्रासादादीन् सृजा इतीक्षित्वेक्षानन्तरं
प्रासादादीन्सृजति तद्वत्। ननु सोपादानस्तक्षादिः प्रासादादीन् सृजती
ति युक्तं निरूपादानस्त्वात्मा कथं लोकान् सृजतीति। नायं दोषः। सलिलफे
नस्थानीये अरूपेऽव्याकृते आत्मैकशब्दवाच्ये व्याकृतफेनस्थानीयस्य
जगत उपादानभूते संभवः। तस्मादात्मभूतनामरूपोपादानः सन् सर्वज्ञो

"Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

जगन्निर्मिमीत इति न विरुद्धम्। अथवा यथा विज्ञानवान्मायावी निरुपादान आत्मानमेवात्मान्तरत्वेनाकाशी गच्छन्निव निर्मिमीते। तथा सर्वज्ञो देवः सर्वशक्तिर्महामाय आत्मानमेवात्मान्तरत्वेन जगद्रूपेण निर्मिमीत इति। युक्ततरम्। एवं च सति कारणकार्यो भयासद्वादादिपक्षाश्च न प्रसज्यंते सुनिराकृताश्च भवंति। कांल्लोकानसृजतेत्याह। अंभो मरीचीर्मरमाप इति। आकाशादिक्रमेणांडमुत्पाद्यांभः प्रभृतीन् लोकानसृजत्। तत्रांभःप्रभृतीन् स्वयमेव व्याचष्टे श्रुतिः। अदस्तदंभः शब्दवाच्यो लोकः परेण दिवं द्युलोकात्परेण परस्तात् सोंभःशब्दवाच्यो लोकः। अपांभरणात्। द्यौः प्रतिष्ठाश्रयस्तस्यांभसो लोकस्य। द्युलोकादधस्तादन्तरिक्षं यत्तन्मरीचयः। एकोप्यनेकस्थानभेदत्वाद्बहुवचनभाक्। मरीचिभिर्वा रश्मिभिः संबंधात् पृथिवी मरो म्रियंतेऽस्मिन् भूतानीति। या अधस्तात् पृथिव्यास्ता आप उच्यते। आपो ते लोकाः। यद्यपि पंचभूतात्मकत्वं लोकानां तथापि अब्बाहुल्याद् अब्नामभिरेवांभो मरीचीर्मरमाप इत्युच्यन्ते॥२॥ सर्वप्राणिकर्मफलोपादानाधिष्ठानभूतान् चतुरो लोकान् सृष्ट्वा स ईश्वरः पुनरेवेक्षत। इमे न्वंभःप्रभृतयो मया सृष्टा लोकाः परिपालयितृवर्जिता विनश्येयुः। तस्मादेषां रक्षणार्थं लोकपालान् सृजेहमिति। एवमीक्षित्वा सोऽद्भ्य एवाप्प्रधानेभ्यः पंचभूतेभ्यो येभ्यो अंभःप्रभृतीन् सृष्टवान् तेभ्य एवेत्यर्थः। पुरुषं पुरुषप्रकारं शिरःपाण्यादिमंतं समुद्धृत्याद्भ्यः समुपादाय मृत्पिण्डमिव कुलालः पृथिव्या अमूर्छयत् संमूर्छितवान् सम्पिंडितवान् स्वावयवसंयोजनेनेत्यर्थः॥३॥ तं पिंडं पुरुषविधमुद्दिश्याभ्यतपत् तदभिध्यानं संकल्पं कृतवानित्यर्थः। "यस्य ज्ञानमयं तप" इति श्रुतेः। तस्याभितप्तस्येश्वरसंकल्पेन तपसाभितप्तस्य पिंडस्य मुखं निरभिद्यत मुखाकारं सुषिरमजायत। यथा पक्षिणोंडं निरभिद्यत। एवं तस्मान्निर्भिन्नान् मुखाद्वाक् करणमिंद्रियं निरवर्तत। तदधिष्ठानाग्निस्ततो वाचो लोकपालः। तथा नासिके निरभिद्येताम्। नासिकाभ्यां प्राणः प्राणाद्वायुरिति सर्वत्राधिष्ठानं करणं देवता च त्रयं क्रमेण निरभिन्नमिति। अक्षिणी कर्णौ त्वक् हृदयमंतःकरणाधिष्ठानम्। मनोन्तःकरणम्। नाभिः सर्वप्राणनिबंधनस्थानं तस्मादपानसंयुक्तत्वादपान इति पाय्विंद्रियमुच्यते। तस्याधिष्ठात्री देवता मृत्युर्यथान्यत्र तथा शिश्नं निरभिद्यत प्रजननेंद्रियस्थानमिंद्रियं रेतो विसर्गार्थत्वात् सह रेतसोच्यते रेतस आप इति। प्रथमखंडभाष्यम्।४।१॥

ब्रह्मविद्यासाधनकृतसर्वात्मभावफलावाप्तिं वामदेवाद्याचार्यपरंपरया श्रुत्याऽवबोध्यमानां ब्रह्मवित्परिषद्यत्यंतप्रसिद्धामुपलभमाना मुमुक्षवो ब्राह्मणा अधुनातना ब्रह्मजिज्ञासवोऽनित्यात् साधनलक्षणात् संसारादाजीवभावाद्व्यावृत्तसवो विचारयंतोऽन्योन्यं पृच्छंति कथं यं न्वात्मानमयमात्मेति साक्षादुपासीनो वामदेवोऽमृतः समभवत् तमेव वयमप्युपास्महे। कोन्वात्मेति।

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

इत्यैतरेया आमनन्ति॥ ॐ॥ कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा येन वा रूपं पश्यति येन वा शब्दं शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति ॥१॥ यदेतद्धृदयं मनश्चैतत् संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः संकल्पः क्रतुरसुः कामो वश इति। सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति ॥२॥ एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव। बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरम्। सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म ॥३॥ स एतेन प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः समभवत् समभवत् इत्योम् ॥४॥ इत्यैतरेयारण्यके षष्ठोऽध्यायः। उपनिषत्सु तृतीयोऽध्यायः॥ ॐ तत्सत्। हरिः ॐ॥ ६॥

अत्राचार्यशांकर भाष्यं तद्यथा॥ एवं जिज्ञासापूर्वमन्योन्यं पृच्छतामतिक्रान्तविशेषविषयश्रुतिसंस्कारजनिता स्मृतिरजायत। तं प्रपदाभ्यां प्रापद्यत *ब्रह्मेमं पुरुषं स एतमेव सीमानं विदार्य तया द्वा

* ब्रह्मेममिति किं तत् ब्रह्म इत्यत्र सामवेदीयकेनोपनिषत्सु प्रतिपादितं यथा॥ यद्वाचानभ्युदितं येन वागभ्युद्यते। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥४॥ यन्मनसा न मनुते येनाहुर्मनो मतम्। तदे॰ ॥५॥ यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति, तदेव॰ ॥६॥ यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम्॥ तदेव॰ ॥७॥ यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते॥ तदेव॰ ॥८॥ इतिखंडः १॥ १ शांकरभाष्यम्। सत्यानृते एव विकारो यस्यास्तया वाचा पदत्वेन परिच्छिन्नया करण गुणवत्याऽनभ्युदितमप्रकाशितमनभ्युक्तं येन ब्रह्मणा [illegible] विवक्षितेऽर्थे सकारणा वागभ्युद्यते चैतन्यज्योतिषा प्रकाश्यते प्रयुज्यत इत्येतत्। यद्वाचो ह वागित्युक्तं वदन्वाक् यो वाचमन्तरो यमयतीत्यादि च वाजसनेयके। या वाक् पुरुषेषु प्रतिष्ठिताक्षरं चित्तं वेद

“Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai”

राऽप्रपद्यत एतमेव पुरुषम्। द्वे ब्रह्मणी इतरेतर प्रातिकूल्येन प्रतिपन्ने इति।
ते चास्य पिंड[illegible]स्यात्मभूते। तयोरन्यतर आत्मोपास्यो भवितुमर्हति।
यो ओपास्यः कतरोऽनुस आत्मेति विशेषनिर्धारणार्थं पुनरन्योन्यं पप्र
च्छुर्विचारयन्तः। पुनस्तेषां विचारयतां विशेषविचारणास्पद विषया मतिर
भूत्। कथं द्वे वस्तुन्यस्मिन् पिंडे उपलभ्येते अनेकभेदभिन्नेन करणेन।
येनोपलभ्यते यस्मै वैकऽउपलभ्यते करणांतरोपलब्ध विषयस्मृति संधाना
त्। तत्र न तावद्येनोपलभ्यते स आत्मा भवितुमर्हति। केन पुनरुपलभ्य
त इति। उच्यते। येन वा चक्षुषा रूपं पश्यति येन वा शृणोति श्रोत्रेण शब्दं
येन वा घ्राणभूतेन गंधानाजिघ्रति येन वा करणभूतेन वाचं नामात्मिकां
व्याकरोति गौरश्व इत्येवमाद्यां साध्वसाध्विति च। येन वा जिह्वाभूतेन
स्वादु चास्वादु च विजानातीति॥३॥ किं पुनस्तदेकमनेकधा भिन्नं करणमि
त्युच्यते। यदुक्तं पुरस्तात् प्रजानां रेतो हृदयं हृदयस्यं रेतो मनो मनसा सृष्टा
आपश्च वरुणश्च। हृदयान्मनो मनसश्चन्द्रमा तदेवैतद्धृदयं मन एवैक
मेतदनेकधा। एतेनांतःकरणेनैकेन चक्षुर्भूतेन रूपं पश्यति श्रोत्रभूतेन
शृणोति घ्राणभूतेन जिघ्रति वाग्भूतेन वदति जिह्वाभूतेन रसयति स्वेनैव

ब्राह्मण इति प्रश्नमुत्पाद्य प्रतिवचनमुक्तं सा वा गयया स्वयं भाष्यत इति। सा
हि वक्तुर्वक्तिर्निरव्या वाक् चैतन्यज्योतिः स्वरूपा। नहि वक्तुर्वक्तेर्विपरिलो
पो विद्यत इति श्रुतेः। तदेवात्मस्वरूपं ब्रह्म निरतिशयं भूमाख्यं बृहत्वाद्ब्र
ह्मेति विद्धि जानीहि त्वं यैर्वागाद्युपाधिभिः। वाचो ह वाक् चक्षुषश्चक्षुः
श्रोत्रस्य श्रोत्रं मनसो मनः कर्ता भोक्ता विज्ञाता नियंता प्रशासिता वि
ज्ञानमानंदं ब्रह्मेत्येवमादयः संव्यवहारा असंव्यवहार्ये निर्विशेषे परे सौ-
म्ये ब्रह्मणि प्रवर्त्तन्ते तान् व्युदस्यात्मानमेव निर्विशेषं ब्रह्म विद्धीत्येव
शब्दार्थः। नेदं ब्रह्म यदिदमित्युपाधिभेदविशिष्टमनात्मेश्वराद्युपा
सते। ध्यायंति। तदेव ब्रह्म त्वं विद्धीत्युक्तेऽपि नेदं ब्रह्मेत्यनात्मनोऽब्रह्म
त्वं पुनरुच्यते। नियमार्थमन्यद्ब्रह्मबुद्धिपरिसंख्यानार्थं वा॥४॥
यन्मनसा न मनुते। मन इत्यंतःकरणं बुद्धिमनसोरेकत्वेन गृह्यते।
मनुतेऽनेनेति मनः सर्वकरणसाधारणम्। सर्वविषयव्यापकत्वात्। कामः
संकल्पो विचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवे
ति श्रुतेः। कामादिवृत्तिमन्मनस्तेन मनसा यच्चैतन्यज्योतिर्मनसोऽव
भासकं न मनुते न संकल्पयति नापि निश्चिनोति। मनसोऽवभासकत्वेन नि
यंतृत्वात्। सर्वविषयं प्रति प्रत्यगेवेति स्वात्मनि न वर्ततेऽन्तःकरणम्। अंत



Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai ... Joint project

विकल्पनारूपेण मनसा विकल्पयति। हृदयरूपेणाध्यवस्यति। तस्मात् सर्वकरणविषयव्यापारकमेकमिदं करणं सर्वोपलब्ध्यर्थमुपलब्धुः। तथा च कौषीतकीनां प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति। इत्यादि॥ वाजसनेयके च। "मनसा ह्येव पश्यति मनसा शृणोति हृदयेन हि रूपाणि जानाति"। इत्यादि। तस्माद्धृदयमनोवाच्यस्य सर्वोपलब्धिकरणत्वं प्रसिद्धम्। तदात्मकश्च प्राणो यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स प्राण इति ब्राह्मणम्। करणसंहतिरूपश्च प्राण इत्यवोचाम प्राणसंवादादौ। तस्मात् यत्पद्भ्यां प्रापद्यत ब्रह्मैतदुपलब्धिकरणत्वेन गुणभूतत्वान्नैतद्वस्तु ब्रह्मोपास्यात्मा भवितुमर्हति। परिशेषाद्यस्योपलब्धुरुपलब्ध्यर्थमेतस्य हृदयमनोरूपस्य करणस्य वृत्तयो वक्ष्यमाणाः स उपलब्धोपास्य आत्मा नो भवितुमर्हतीति निश्चयं कृतवन्तः। तदन्तःकरणोपाधिस्थस्योपलब्धुः प्रज्ञानरूपस्य ब्रह्मण उपलब्ध्यर्था या अंतःकरणवृत्तयो बाह्यांतर्वर्तिविषयविषया स्ता इमा उच्यंते। संज्ञानं संज्ञप्तिश्चेतनभावः। आज्ञानमाज्ञप्तिरीश्वरभावः। विज्ञानं कलादिपरिज्ञानम्। प्रज्ञानं प्रज्ञप्तिः प्रज्ञता। मेधा ग्रंथधारणसामर्थ्यम्। दृष्टिरिंद्रियद्वारा सर्वविषयोपलब्धिः। धृतिर्धारणं अवसन्नानां शरीरेंद्रियाणां ययोत्तंभनं भवति। धृत्या शरीरमुद्वहंतीति हि वदंति। मतिर्मननम्। मनीषा तत्र स्वातंत्र्यम्। जूतिश्चेतसो रुजादिदुःखित्वभावः। स्मृतिः स्मरणम्। संकल्पः शुक्लकृष्णादिभावेन संकल्पनं रूपादीनाम्। क्रतुरध्यवसायः।

---

स्थे नहि चैतन्यज्योतिषाऽवभासितस्य मनसो मननसामर्थ्यं तेन सवृत्तिकं मनो ब्रह्मणा मतं विषयीकृतं व्याप्तमाहुः कथयंति ब्रह्मविदः। तस्मात्तदेव मनस आत्मानं प्रत्यक्चेतयितारं ब्रह्म विद्धि नेदमित्यादि पूर्ववत॥ यच्चक्षुषा न पश्यति न विषयीकरोत्यंतःकरणवृत्तिसंयुक्तेन येन चक्षूंषि अंतःकरणवृत्तिभेदभिन्नाश्चक्षुर्वृत्तीः पश्यति लोकश्चैतन्यात्मज्योतिषा विषयीकरोति व्याप्नोति। यच्छ्रोत्रेण न शृणोति दिग्देवताधिष्ठितेनाकाशकार्येण मनोवृत्तिसंयुक्तेन विषयीकरोति लोको येन श्रोत्रमिदं श्रुतं यत्प्रसिद्धं चैतन्यात्मज्योतिषा विषयीकृतं तदेव पूर्ववत्। यत्प्राणेन घ्राणेन पार्थिवेन नासिकापुटांतरावस्थितेनांतःकरणप्राणवृत्तिभ्यां सहितेन यन्न प्राणिति गंधवन्न विषयीकरोति येन चैतन्यात्मज्योतिषावभास्यत्वेन स्वविषयं प्रति प्राणः प्रणीयते तदेवेत्यादि। इति भाष्यम्॥ अनात्मन्यपि ब्रह्मबुद्धौ प्राप्तायां मात्मैव ब्रह्मेति बुद्धिं नियंतुमित्यर्थः। अस्मिन्नुपास्ये या ब्रह्मबुद्धिस्तन्निवृत्त्यर्थं वा यन्नत्वमसि एवमुच्यत इत्यर्थः। इति भाष्यटीका॥



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(१५)



असुः प्राणनादिजीवनक्रियानिमित्ता वृत्तिः। कामोऽसन्निहितविषयाकांक्षा तृष्णा। वशः स्त्रीव्यतिकराद्यभिलाष इत्येवमाद्या अंतःकरणवृत्तयः। प्रज्ञप्तिमात्रस्योपलब्धुरूपत्वध्यर्थत्वात्। शुद्धप्रज्ञानरूपस्य ब्रह्मणो नामरूपस्य ब्रह्मण उपाधिभूताः। तदुपाधिजनितगुणनामधेयानि संज्ञादीनि सर्वाण्येवैतानि प्रज्ञप्तिमात्रस्य प्रज्ञानस्य नामधेयानि भवंति न स्वतः साक्षात्। तथाचोक्तं प्राणन्नेव प्राणो नाम भवतीत्यादि ॥२॥ स एष प्रज्ञानरूप आत्मा ब्रह्म। अपरं सर्वशरीरस्थ प्राणप्रज्ञात्मांतःकरणोपाधिष्वनुप्रविष्टो जलभेदगतसूर्यप्रतिबिंबवद्धिरण्यगर्भः प्राणः प्रज्ञात्मा। एष एवेंद्र इन्द्रगुणाद्देवराजो वा। एषः प्रजापतिर्यः प्रथमजः शरीरी। यतो मुखादिनिर्भेदद्वारेणाग्न्यादयो लोकपाला जाताः। स प्रजो वा एषः प्रजापतिरेष एव ये च्येते अग्न्यादयः सर्वे देवा एष एव। इमानि च सर्वशरीरोपादानभूतानि पंच पृथिव्यादीनि महाभूतान्यन्नान्नादत्वलक्षणान्येतानि। किं चेमानि च क्षुद्रैरल्पकैर्मिश्राणि सर्पादीनि। इवशब्दोऽनर्थकः। बीजानि कारणानि चेतराणि चेतराणि च। द्वैराश्यत्वेन निर्दिश्यमानानि कानि तानीत्युच्यंते। अंडजानि पक्ष्यादीनि। जारुजानि जरायुजानि मनुष्यादीनि। स्वेदजानि यूकादीनि। उद्भिज्जानि च वृक्षादीनि। अश्वाः गावः मनुष्याः हस्तिनः अन्यच्च यत्किंचेदं प्राणिजातम्। किं तत्। जंगमं यच्चलति पद्भ्यां गच्छति। यच्च पतत्रि आकाशेन पतनशीलम्। यच्च स्थावरमचलं सर्वं तत् अशेषं प्रज्ञानेत्रम्। प्रज्ञप्तिः प्रज्ञा तच्च ब्रह्मैव नीयतेसत्तां प्राप्यतेऽनेनेति नेत्रं प्रज्ञा नेत्रं यस्य तदिदं प्रज्ञानेत्रम्। प्रज्ञाने ब्रह्मण्युत्पत्तिस्थितिलयकालेषु प्रतिष्ठितं प्रज्ञाश्रयमित्यर्थः। प्रज्ञानेत्रो लोकः पूर्ववत्। प्रज्ञा चक्षुर्वा सर्व एव लोकः। प्रज्ञा प्रतिष्ठा सर्वस्य जगतः। तस्मात् प्रज्ञानं ब्रह्म। तदेतत् प्रत्यस्तमितसर्वोपाधिविशेषं सन्निरंजनं निर्मलं निष्क्रियं शान्तमेकमद्वयं नेति सर्वविशेषापोहसंवेद्यं सर्वशब्दप्रत्ययागोचरं तदत्यंतविशुद्धप्रज्ञोपाधिसंबंधेन सर्वज्ञमीश्वरसंज्ञं भवति। सर्वसाधारणाव्याकृतजगद्बीजप्रवर्तकं नियंतृत्वादन्तर्यामिसंज्ञं भवति। तदेव जगद्बीजभूतबुद्ध्यात्माभिमानलक्षणहिरण्यगर्भसंज्ञं भवति। तदेवांतरण्डोद्भूतप्रथमशरीरोपाधिमद्विराट्प्रजापतिसंज्ञं भवति। तदुद्भूताग्न्याद्युपाधिमद्देवतादिसंज्ञं भवति। तथा विशेषशरीरोपाधि

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ष्वपि ब्रह्मादिस्तम्ब पर्यन्तेषु तत्तन्नामरूपलाभो ब्रह्मणस्तदेवैकं
सर्वोपाधिभेदभिन्नं सर्वैः प्राणिभिस्तार्किकैश्च सर्वप्रकारेण ज्ञाय
ते विकल्प्यते चानेकधा। एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिं, इ
न्द्रमेके ऽपरे प्राणमपरे ब्रह्म शाश्वतमित्याद्या स्मृतिः॥३॥ सर्वाम दे
वोऽन्योवा एवं यथोक्तं ब्रह्म यो वेद प्रत्तेनात्मना येनैव प्रत्तेनात्मना
पूर्वे विद्वांसोऽमृता अभूवन् तथाय मपि विद्वानेतेनैव प्रत्तानेना
स्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वाऽमृतः
समभवदित्योमिति शंकरभाष्यम्॥४॥ हरिः ॐ तत्सत्॥५॥

## * अथ गुरुमहिमा

एवमात्मज्ञानं मुपनिषद्भ्यमाणेन प्रपंचितं तदेव मुक्तिप्रदं
न्चैतद्गुरुं विनाऽप्राप्यमित्यत्राथर्ववेदीयमुण्डकोपनिषत्सु प्रतिपादितं त
द्यथा॥ परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृ
तेन॥ तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनि
ष्ठम्॥१२॥ प्र॰सं॰ख॰२॥ अत्र भगवान् भाष्यकारः शंकराचार्यो व्याचष्टे
मंत्रमिमम्॥ अथेदानीमस्मात् साध्यसाधनरूपात् सर्वस्मात् संसारा-
द्विरक्तस्य विद्यायामधिकारप्रदर्शनार्थमिदमुच्यते। परीक्ष्य यदेतदृ-
ग्वेदाद्यपरविद्याविषयं स्वाभाविकस्याविद्याकामकर्मदोषवत्पुरुषानु
ष्ठेयमविद्यादिदोषवन्तमेव पुरुषं प्रतिविहितत्वात्तदनुष्ठानकार्यभू
ताश्च लोका ये दक्षिणोत्तरमार्गलक्षणाः फलभूता ये च विहिताकरणप्र
तिषेधातिक्रमदोषसाध्या नरकतिर्यक्प्रेतलक्षणास्तानेतान् परीक्ष्य
प्रत्यक्षानुमानोपमानागमैः सर्वतो यथात्म्येनावधार्य लोकान् संसा
रगतिभूतानव्यक्तादिस्थावरांतान् व्याकृताव्याकृतलक्षणान् बीजांकु
रवदितरेतरोत्पत्तिनिमित्ताननेकानर्थशतसहस्रसंकुलान् कदली
गर्भवदसारान् मायामरीच्युदकगंधर्वनगराकारस्वप्नजलबुद्बु
दफेनसमान् प्रतिक्षणध्वंसान् पृष्ठतः कृत्वाऽविद्याकामकर्मदोषप्र
वर्तितकर्मचितान् धर्माधर्मनिर्वर्तकानित्येतद्ब्राह्मणस्यैव विशे
षतोऽधिकारः। सर्वत्यागेन ब्रह्मविद्यायामिति ब्राह्मणग्रहणम्। परी
क्ष्य लोकान् किं कुर्यादित्युच्यते। निर्वेदं निः पूर्वो विदिरत्र वैराग्यार्थे।

* गुरुरिति। निरत्यज्ञानं गृणात्युपदिशति वा ज्ञानं गृ निगरणे तु॰प॰स॰सेट् गिर
ति गिलति अगारीत्। कु उञ्च। स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति। आचार्यः॥

Joint project of the Rajwade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai

वैराग्य माचात् कुर्यात्। इत्येतत्। स वैराग्य प्रकारः प्रदर्श्यते। इह संसारे नास्ति कश्चिदप्यकृतः पदार्थः। सर्व एव हि लोकाः कर्मचिताः कर्मचितत्वाच्चानित्याः। न नित्यं किंचिदस्तीत्यभिप्रायः। सर्वं तु कर्मा नित्यस्यैव साधनम्। यस्माच्चतुर्विधमेव हि सर्वं कर्म कार्यमुत्पाद्यमाप्यं संस्कार्यं विकार्यं वा नातः परं कर्मणां विषयोऽस्ति। अहं च नित्येनामृतेनाभयेन कूटस्थेनाचलेन ध्रुवेणार्थी न तद्विपरीतेन। अतः किं कृतेन कर्मणाऽऽयासबाहुल्येनानर्थसाधनेनेत्येवं निर्विण्णोऽभयं शिवमकृतं नित्यं पदं यत्तद्विज्ञानार्थं विशेषेणाभिगमार्थं स निर्विण्णो ब्राह्मणो गुरुमेवाचार्यं शमदमदयासम्पन्नमधिगच्छेत्। शास्त्रज्ञोऽपि स्वातंत्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यादित्येतद्गुरुमेवेत्यवधारणफलम्। समित्पाणिः समिद्भारगृहीतहस्तः श्रोत्रियमध्ययनश्रुतार्थसंपन्नं ब्रह्मनिष्ठं हित्वा सर्वकर्माणि केवलेऽद्वये ब्रह्मणि निष्ठा यस्य सोऽयं ब्रह्मनिष्ठस्तपोनिष्ठ इति यद्वत्। न हि कर्मिणो ब्रह्मनिष्ठा संभवति कर्मात्मज्ञानयोर्विरोधात्। स तं गुरुं विधिवदुपसन्नः प्रसाद्य पृच्छेदक्षरं पुरुषं सत्यमिति भाष्यम्॥ गुर्वभिगमनप्रकारं भगवानप्याह गीतासु। "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया॥ उपदेक्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः"॥ इति भग॰ अ॰ ४। श्लो॰ ३४॥ अस्यार्थः। तद्विद्धि तज्ज्ञानं विद्धि प्राप्नुहीति भगवानाहार्जुनं प्रति। ज्ञानिनां प्रणिपातेन। प्र। नि। पत् धञ् प्रणामेन दंडवन्नमस्कारेण श्रुतिरप्याह। "उरसा शिरसा दृष्ट्या वचसा मनसा तथा। पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टांग उच्यते" इति॥ ततः परिप्रश्नेन कुतोऽयं मम संसारः कथं वा निवर्तत इति प्रश्नेन सेवया शुश्रूषया च ज्ञानिनः शास्त्रज्ञास्तत्त्वदर्शिनः अपरोक्षानुभवसंपन्नाश्च ते तुभ्यं ज्ञानमुपदेशेन संपादयिष्यंतीत्यर्थः॥ इत्थं गुरुकृपां विहाय ब्रह्मज्ञानं तु दुर्लभतरमित्यत्र श्वेताश्वतरोपनिषत्सु प्रतिपादितं तद्यथा॥

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ॥ तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः प्रकाशन्ते महात्मनः॥ २३॥ इति श्वेताश्वतरोपनिषत्सु षष्ठोऽध्यायः॥ अत्र शांकरभाष्यम्॥ अत्रापि देवतागुरुभक्तिमतामेव गुरुणा प्रकाशिता विद्यानुभवाय भवतीति प्रदर्शयति। यस्येति। यस्य पुरुषस्याधिकारिणो देवे इयता प्रबंधेन दर्शिताऽखंडैकरसे सच्चिदानंदपरज्योतिस्स्वरूपिणि परमेश्वरे परा उत्कृष्टा निरुपचरिता भक्तिः। एतदुपलक्षणम्। अचांचल्यं श्रद्धा चोभे यथा तथा ब्रह्मविद्योपदेष्टृगुरावपि तदुभयं यस्य वर्तते तस्य तप्तशिरसो जलराश्यन्वेषणं विहाय यथा साधनांतरं नास्ति। यथा च बुभुक्षितस्य भोजनादन्यत्र साधनांतरं न। एवं गुरु

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

कृपां विहाय ब्रह्मविद्या दुर्लभेति त्वरान्वितस्य मुख्याधिकारिणो महात्मन उत्तमस्य एते कथिता अस्यां श्वेताश्वतरोपनिषदि श्वेताश्वतरेण महात्मना कथितोपदिष्टाः प्रकाशंते स्वानुभवाय भवंति। द्विर्वचनं मुख्य शिष्य तत्साधनादि दुर्लभ प्रदर्शनार्थमध्याय परिसमाप्त्यर्थमादरार्थश्चेति ॥ नन्वत्रोपनिषत्सु "तद्विज्ञानार्थं स गुरुमेवाभिगच्छे" दित्युक्तं तत्र पिता जनक एव गुरुस्तमेवाभिगच्छेदिति किं नोक्तं? सत्यमेव परंतु पिता शरीरमात्रं जनयति न तु विज्ञानं, यदि स विज्ञानं जनयिष्यति तर्हि तमेवाभिगच्छेन्नेतरमित्यविरुद्धम्। अविद्यामहोदधेः परं पारं तारको ज्ञानजन्मकृद्गुरुरेवेत्यत्राथर्ववेदीयप्रश्नोपनिषत्सु प्रतिपादितं तद्यथा ॥ तान् होवाचैतावदेवाहमेतत् परं ब्रह्म वेद। नातः परमस्तीति ॥७॥ ते तमर्चयन्तस्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति। नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥८॥ इति षष्ठः प्रश्नः ॥ अत्र शांकरभाष्यम् ॥ तानेवमनुशिष्य शिष्यान् तान् होवाच पिप्पलादः किलैतावदेव वेद्यं परं ब्रह्म वेद विजानाम्यहमेतत् नातोऽस्मात् परमस्ति प्रकृष्टतरं वेदितव्यमित्येवमुक्तवान्। शिष्याणामविदित शिष्यास्ति त्वाशंका निवृत्तये कृतार्थबुद्धिजननार्थं च। ततस्ते शिष्या गुरुणानुशिष्टास्तं गुरुं कृतार्थाः संतो विद्यानिष्क्रियमपश्यंतः किं कृतवंत इत्युच्यते। अर्चयंतः पादयोः पुष्पांजलि प्रकिरणेन प्रणिपातेन च शिरसा किमूचुरित्याह। त्वं हि नोऽस्माकं पिता ब्रह्म शरीरस्य विद्यया जनयितृत्वान्नित्यस्याजरामरस्याभयस्य। यस्त्वमेवास्माकमविद्याया विपरीतज्ञानाज्जन्मजरामरणरोगदुःखादिग्राहादविद्यामहोदधेर्विद्याप्लवेन परमपुनरावृत्तिलक्षणं मोक्षाख्यं महोदधेरिव पारं तारयस्यस्मान् प्रति। अतः पितृत्वं तवास्मान् प्रत्युपपन्नमितरस्मात्। इतरोऽपि हि पिता शरीरमात्रं जनयति तथापि संप्रपूज्यतमो लोके किमु वक्तव्यमात्यंतिकाभयदातुरित्यभिप्रायः। नमः परमऋषिभ्यो ब्रह्मविद्या संप्रदायकर्तृभ्यो नमः परमऋषिभ्य इति द्विर्वचनमादरार्थमिति भाष्यम् ॥

इत्थं गुरुमाचार्यं विनाऽऽत्मसुखानुपलब्धेरित्यत्रोपदेशसहस्रीकृद्भगवानाचार्यः शंकर आह ॥ दशमस्यनवात्मत्व प्रतिपत्तिवदात्मनः। दृश्येषु तद्वदेवायं मूढो लोको न चान्यथा ॥ अत्र श्रीरामतीर्थयतिर्व्याचष्टे ॥ दशहि माणवकाः कश्चिन्नदीं तीर्त्वा पारं गताः



"Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

संतो गणयामासुः कतिवयं स्म इति। तत्र गणयिता स्वात्मानं विहाय
नवैव गणयति स्मेति प्रसिद्धिः। तत्र यद्वद्यथा दशमस्यात्मनो मा
णवकस्य गणयितुरविवेकान्नवात्मत्व प्रतिपत्तिः। नवभ्योऽन्यमा-
त्मानं नविंदति। नवैव वयं दशमो नास्तीति भ्रांतिरुपलभ्यत इत्यर्थः॥
तद्वत्तथैवायं लोको बुध्यादिषु दृश्येष्वेवात्मतादात्म्य प्रतिपत्त्या
मूढः शास्त्राचार्योपदेशहीनः स्वात्मानमन्यथा प्रतिपद्यते। नचा
न्यथा वैपरीत्येन बुध्याद्यपोहे ब्रह्मास्मीति स्वरूप याथात्म्यं नवे
त्तीत्यर्थः॥ अत्र विना गुरुमात्मप्राप्तेरभावादिति माणवकाख्या
यिकया सिद्धमिति॥ तस्याचार्यस्य गुरोर्लक्षणं तत्रैव कथि
तं तद्यथा॥ गद्यम्॥ आचार्यस्तूहापोह ग्रहण धारण शमदम
दयानुग्रहादि सम्पन्नो लब्धागमो दृष्टादृष्टभोगेष्वनासक्तस्त्य
क्तसर्वकर्मसाधनो ब्रह्मविद्ब्रह्मणि स्थितोऽभिन्नवृत्तो दंभदर्पकु
हकशाठ्यमायामात्सर्यानृताहंकार ममत्वादि दोष विवर्जितः के
वल परानुग्रह प्रयोजनो विद्योपयोगार्थी पूर्वमुपदिशेत्॥ इति॥
एवं लक्षणैर्युक्त आचार्य एवेश्वरो नान्य इत्यत्र स्मृतिः। गुरुर्ब्र-
ह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः॥ गुरुः साक्षात्परं ब्रह्म तस्मै श्री
गुरवे नमः॥ इति गुरुमहिमा॥ महिमन् पु॰। महतो भावः इम
निच् डित्वेन टिलोपः। महत्वमित्यर्थः॥ ॐ तत्सत्॥ हरिः ॐ॥

॥ अथ ब्रह्मज्ञानाधिकारः॥

तत्र तावदित्थं भूत लक्षण आचार्यः प्रागुक्त लक्षण संपन्नं पु
रुषं ब्रह्मविद्यामुपदिशेदित्यत्र श्रुतिराह॥ तस्मै स विद्वानुपस
न्नाय सम्यक्प्रशान्तचित्ताय शमान्विताय॥ येनाक्षरं पुरुषं
वेद सत्यं प्रोवाच तां तत्वतो ब्रह्मविद्याम्॥१३॥ इति प्र॰ मुं॰ खं॰ २॥
अत्र भाष्यकृच्छंकराचार्य आह। तस्मै स विद्वान् गुरुर्ब्रह्मवि
दुपसन्नायोपगताय। सम्यग्यथाशास्त्रमित्येतत्। प्रशान्तचित्तायोप
रत दर्पादिदोषाय। शमान्विताय। बाह्येंद्रियोपरमेण च युक्ताय सर्वतो वि
रक्तायेत्येतत्। येन विज्ञानेन यथा विद्यया च परयाऽक्षरमद्रेश्यादि विशे
षणं तदेवाक्षरं पुरुषशब्दवाच्यं पूर्णत्वात् पुरिशयनाच्च सत्यं तदेव परमार्थ
स्वाभाव्यादक्षरं चाक्षरणादक्षततत्वादक्षयत्वाच्च वेद जानाति। तां ब्रह्मवि
द्यां तत्वतो यथावत्प्रोवाच प्रब्रूयादित्यर्थः। आचार्यस्याप्ययं नियमो य -



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

न्याय प्राप्त शिष्य निस्तारणमविद्यामहोदधेरिति॥ नैतादृशं ब्राह्मणस्यास्ति वित्तं यथा एकता समता इतिस्मृतेः। ब्राह्मणस्यैवाधिकार इति भाष्यटीकाकृदानंदज्ञानाचार्येणोक्तं तद्विषये श्रुतयः प्रोचुः॥

विद्या ह वै ब्राह्मणमाजगाम गोपाय माशेवधिष्टेहमस्मि॥ असूयकायानृजवे यतायनमां ब्रूया वीर्यवती तथा स्याम्॥ यमेव विद्या श्रुतमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम्॥ अस्मा इमामुपसन्नाय सम्यक् परीक्ष्य दद्याद्वैष्णवीमात्मनिष्ठाम्॥ इत्थं श्रुतिप्रमाणैस्तु ब्राह्मण एवाधिकारी स्यादित्यप्याह भगवान् बादरायणः॥ ब्रह्ममीमांसा अ॰१ पा॰३ सूत्रं॥ **हृद्यपेक्षया तु मनुष्याधिकारत्वात्॥२५॥**

मनुष्याणामेव ब्रह्मविचाराधिकारत्वात्तेषां हृदये परमात्मनोऽवस्थितिः। तस्याः सापेक्षत्वं बोधेन ब्रह्मांगुष्ठमात्रम्। ननु वास्तविकं तत्परिमाणमिति सूत्रार्थः स्यादिति चिन्तनिकाकारः॥ अत्र शंकराचार्यादीनां भाष्यं व्याख्याश्च संति तत्र यथा॥ शास्त्रं ह्यविशेषप्रवृत्तमपि मनुष्यानेवाधिकरोति। शक्तत्वादर्थित्वादपर्युदस्तत्वादुपनयनादिशास्त्राच्चेति। द्विरूपा हि वेदान्तवाक्यानां प्रवृत्तिः। क्वचित् परमात्मस्वरूपनिरूपणपरा। क्वचिद्विज्ञानात्मनः परमात्मैकत्वोपदेशपरा। तदत्र विज्ञानात्मनः परमात्मनैकत्वमुपदिश्यतेऽङ्गुष्ठमात्रत्वं कस्यचिदिति शंकराचार्यः॥ जीवस्याप्यंगुष्ठप्रमितत्वं हृदयावर्तित्वात् तदपेक्षमेवेति रामानुजः॥ मनुष्याणामेव वेदविद्यायामधिकार इत्युक्तं तिर्यगाद्यपेक्षयैव मनुष्यत्वविशेषणमुक्तमिति मध्वाचार्यः॥

केन हेतुना अपेक्षया ईश्वरकार्यापेक्षया * ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति भ्रामयन् सर्वभूतानि यंत्रारूढानि मायया॥

---

* ईश्वर इति। ईश ऐश्वर्ये अदादि॰ आत्म॰ सक॰ सेट्। ईष्टे ईशिषे ईशिध्वे ऐशिष्ट। वरच्। ईश एवाहमत्यर्थं न च मा मीशते परे। ददामि च सदैश्वर्यमीश्वरस्तेन कीर्त्यते॥ अत्र मतानि मतवादिनां वर्तन्ते तानि यथा॥ सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्वज्ञः सर्वानुभावीति वात्स्यायनः गौतमसूत्रभाष्यकारः॥१॥ सर्वज्ञ ईश्वर एक एवेत्यन्नंभट्टस्तर्कसंग्रहकारः॥२॥ न मीश्वरं कर्मैवेति मीमांसकाः॥३ वेदोक्तकर्मणः फलदाता ईश्वर इति मीमांसकैकदेशिनः॥४॥ शिव इति

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com